शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या ।

"अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवास जनितान्यबला जनेन
दुःखानि नूनमतिमात्र दुरुद्वहानि ॥"

श्लोकोऽयं 'पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्ति दिशा कविमण्डलमण्डनायमानेन, कविता कामिनी विलासेन अप्रतिम प्रतिभासम्पन्नमहा- विराजितस्य निखिल नाट्य तत्त्वभूतस्य महाकविना कालिदासेन समलङ्कृतस्य, सर्वथा नव नवस्य, काव्य कला भूतस्य नाट्यसाहित्यशिरोरत्न- संस्कृत साहित्य नवनीत स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति ।

अत्र प्रकरणात् प्रतिनिवृत्तेन महर्षिणा कण्वेन वेलोपलक्षणार्थमादिष्टः कण्वशिष्यः — 'हन्त! प्रभातम्' इति लोक्य प्रातः कालस्य वर्णनं करोति ।

शशिनि अन्तर्हिते सा एव इयं कुमुद्वती संस्मरणीय शोभा दृष्टिं न नन्दयति । अबला जनेन इष्ट प्रवास जनितानि दुःखानि नूनम् अतिमात्र दुरुद्वहानि (भवन्ति)।

शशिनि = चन्द्रमसि अन्तर्हिते = अस्तंगते सा = शोभायाः प्रसिद्धा एव इयं = पुरतो दृश्यमाना कुमुद्वती = कुमुदिनी संस्मरणीया = स्मरणयोग्या नष्टेति शोभा = सौन्दर्यं यस्याः सा एवं भूता सती दृष्टिं = नेत्रं न = नहि नन्दयति = आह्लादयति ।

किञ्च शशिनि = शशीव प्रशस्त कुलोत्पन्ने राजनि अन्तर्हिते राजधानीं गते सा = सौन्दर्येण ख्यातिसम्पन्ना एव इयं कौ = पृथिव्यां कुमुद्वती = इयं युवती शकुन्तला विगतशोभा सती दृष्टिं नाह्लादयति ।

इष्टस्य = प्रियस्य = प्रवासः विदेश गमनं तेन जनितानि उत्पन्नानि दुःखानि = कष्टानि अबला जनेन = स्त्रीजनेन नूनं = निश्चयं एव अतिमात्रं = समधिकं यथा स्यात्तथा दुरुद्वहानि = दुःसहानि भवन्ति ।

अत्र शशि कुमुद्वतीभ्यां दुष्यन्त शकुन्तलारूपार्थयोः गम्यमानत्वात् समासोक्तिरलङ्कारः — 'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य वस्तुनः' इति लक्षणात् । नूनमित्युत्प्रेक्षा । उत्तरार्धेन सामान्येन पूर्वार्धस्य विशेषस्य समर्थनात् सामान्येन विशेष समर्थनरूपो- ऽर्थान्तरन्यासः तेन सङ्कराऽलङ्कारः । वसन्ततिलका वृत्तम् — 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ।

उपेन्द्र झा
11/9/20
व्या० प्रा० साहित्य
रा० उ० सं० महावि०
धुरकोली, पूर्णियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

यमकवक्रोक्तिरलङ्कारयोः लक्षणोदाहरण विवेचनम् ।

यमकम् :- 'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।।' इति

अर्थे सति भिन्नार्थस्य स्वर व्यञ्जन समुदायस्य पूर्वोपात्त क्रमेणैव आवृत्तिर्यमकं कथ्यते ।

यथा :- 'नव पलाशपलाश वनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः ।।'

अत्र पदावृत्तिः । 'पलाश-पलाश' इति 'सुरभिं सुरभिं' इत्यत्र च द्वयोः सार्थकत्वम्, 'लतान्त-लतान्त' इत्यत्र प्रथमस्य निरर्थकत्वम्, 'पराग पराग' इत्यत्र द्वितीयस्य । एवमत्र यमकालङ्कारः ।

वक्रोक्तिः :- एकेन = वक्त्रा, अन्यतात्पर्येण उक्तं यद् वाक्यं, अन्येन = श्रोत्रा, यदि श्लेषेण काक्वा वा, अन्यतात्पर्यकत्वेन कल्पितं तदा वक्रोक्तिरलङ्कारः । सा च वक्रोक्तिः, श्लेष वक्रोक्तिः, काकु वक्रोक्तिश्चेति द्विधा । तत्र श्लेष वक्रोक्तिर्यथा —

'के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः,
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्तते,
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ।।'

अत्र वक्त्राऽन्याभिप्रायेणोक्तस्य वाक्यस्य श्रोत्रा श्लेषेण अन्यार्थकतया योजितत्वाद् अत्र वक्रोक्तिरलङ्कारः ।

काकु वक्रोक्तिर्यथा :-

'काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ।।'

अत्र कयाचित्सख्या निषेधार्थे प्रयुक्तो नञ् 'तस्याश्चेतो न दूयते' इति ध्वनिविकारेण (काक्वा) विध्यर्थे = आकार्थे, योजितः तच्चो दूयत एवेति विध्यर्थकतया काक्वा योजितत्वाद् वक्रोक्ति अलङ्कारोऽस्ति ।


उपेन्द्र झा
11/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरखेला, रुड़की

## शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
## साहित्य दर्पण: षष्ठ: परिच्छेद:

आमुखस्य (प्रस्तावनायाः) लक्षण निरूपणम् ।

नटी-विदूषकः पारिपार्श्विक एव वा सूत्रधारेण सम्मिलिताः सन्तो यत्र स्व स्व कर्तव्य विषयमाश्रित्य प्रस्तुतं दृश्यकाव्यं सूचयन्तीति- तैस्तथोक्तैः विचित्रैः वाक्यैः परस्परं सम्भाषणं कुर्वन्ति तत्तु आमुखं विज्ञेयम् । मुखे = प्रारम्भे विधेयत्वाद् आमुखम् । सैव प्रस्तावयति = प्रकृताभिनेयविषयं सूचयतीति व्युत्पत्त्या प्रस्तावना कथ्यते । उक्तञ्च साहित्यदर्पणे :-

'नटीविदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥'

इति रूपेणामुखस्य लक्षणं कृतं आचार्य-विश्वनाथः स्वे साहित्य दर्पणस्य षष्ठे परिच्छेदेति ।

उपेन्द्र झा
11/9/20
सहा० प्रा० साहित्य-
रा० उ० सं० महावि०
सुरसैना, पूर्णियाँ